श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्विट्ठलेशाचार्य विरचितं

॥ श्रीमद्गोकुलाष्टकम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीमद्गोकुलाष्टकम् ॥

श्रीमद्गोकुलसर्वस्वं श्रीमद्गोकुलमण्डनम्।
श्रीमद्गोकुलदृक्तारः श्रीमद्गोकुल जीवनम् ॥ 1 ॥

श्रीमद्गोकुलमित्रेशः श्रीमद्गोकुलपालकः।
श्रीमद्गोकुललीलाब्धिः श्रीमद्गोकुलसंश्रयः ॥ 2 ॥

श्रीमद्गोकुलजीवात्मा श्रीमद्गोकुलमानसः।
श्रीमद्गोकुलदुःखघ्नः श्रीमद्गोकुलवीक्षितः ॥ 3 ॥

श्रीमद्गोकुलसौन्दर्यः श्रीमद्गोकुलसत्फलम्।
श्रीमद्गोकुलगोप्राणः श्रीमद्गोकुलकामदः ॥ 4 ॥

श्रीमद्गोकुलराकेशः श्रीमद्गोकुलतारकः।
श्रीमद्गोकुलपद्माळिः श्रीमद्गोकुलसंस्तुतः ॥ 5 ॥

श्रीमद्गोकुलसङ्गीतः श्रीमद्गोकुललास्यकृत्।
श्रीमद्गोकुलभावात्मा श्रीमद्गोकुलपोषकः ॥ 6 ॥

श्रीमद्गोकुलहृत्स्थानः श्रीमद्गोकुलसंवृतः।
श्रीमद्गोकुलदृक्पुष्पः श्रीमद्गोकुलमोदितः ॥ 7 ॥

श्रीमद्गोकुलगोपीशः श्रीमद्गोकुललालितः।
श्रीमद्गोकुलभोग्यश्रीः श्रीमद्गोकुलसर्वकृत् ॥ 8 ॥

इमानि गोकुलेशस्य नामानि वदने मम।
वसन्तु सन्ततं चैव लीला च हृदये सदा॥ 9॥

॥ श्रीमद्गोकुलाष्टकं समाप्तम्॥